# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (काव्यवर्गः)** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – सुबन्धुकृत-वासवदत्ता (उत्तरार्धः)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।**

१ स चिन्तामणिनाम्नो राज्ञस्तनयः कन्दर्पकेतुरिति स्वप्न एव तन्नामादिकमश्रुणोत् । अनन्तरम् अहो प्रजापते रूपनिर्माणकौशलम् ।

२ सहजसुरभिमुखपरिमलमाघ्रातुकामेव दूरविनिर्गता तन्नासावंशलक्ष्मीः कलङ्कमुक्तेन्दुकलाकलापकोमला ।

३ प्रत्यक्षदृष्टभावाव्यस्थिरहृदया हि कामिनी भवति ।
स्वप्नानुभूतभावा द्रढयति न प्रत्ययं युवतिः ॥

४ तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवनिमग्नमिव सर्वानन्दानामुपरि वर्त्तमानमिवात्मानं मन्यमानो मन्दं मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग ।

**प्रश्नः २** वासवदत्तया स्वप्नदृष्टयुवकवर्णनम् ।

**प्रश्नः ३** ग्रन्थानुगुणं सूर्यास्तवर्णनं कुरुत ।

**प्रश्नः ४** दूतीनां द्व्यर्थकसंवादवर्णनं कुरुत ।

**प्रश्नः ५** कथाशैल्यनुसारेण चन्द्रोदयवर्णनं कुरुत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ सुरेखे सुकपोलरेखे सुरया सुरयाचिताश्रीस्त्वमसि । मत्ते कलहे ! कलहेमकाञ्चीदामक्वणितैः स्मरमिवाह्वयसि ।

२ तमपि पश्यन्ती वासवदत्ता मुमूर्च्छ । अथ मकरन्दसखीजनप्रयत्नाल्लब्धसंज्ञा-वेतावेकासनमलञ्चक्रतुः ।

३ अरण्येनेव गण्डशोभितेन वनस्पतिनेव स्कन्धशोभितेन वज्रेणेवेन्द्रायुधेन मनोजवनाम्ना तुरगेण तया सह नगरान्निर्जगाम ।

४ शिशुजनलीलामिव धात्रीधृतिम् क्वचिद्रावचित्तवृत्तिमिव वैदेहीमयम् क्वचित्क्षीरसमुद्रमथनवेलामिव उज्जृम्भमाणामृताम् ।

**प्रश्नः ७** ग्रन्थानुसारेण विन्ध्याटवीवर्णनं कुरुत ।

**प्रश्नः ८** कथाशैल्यनुसारेण प्रातःकालवर्णनं कुरुत ।

**प्रश्नः ९** शरत्कालवर्णनं कुरुत ।

**प्रश्नः १०** किरातयोः युद्धवर्णनं कुरुत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वासवदत्तायाः कर्ता कः ?
२ वासवदत्तया स्वप्ने कः पुरुषः दृष्टः ?
३ कन्दर्पकेतोः पितुः नाम किम् ?
४ वासवदत्तया प्रेषितायाः सारिकायाः नाम किम् ?
५ सम्पूर्णां कथां कः श्रावयति ?
६ कन्दर्पकेतोः मित्रस्य नाम किम् ?
७ रम्भा कम् अचीकमत ?
८ पाटलिपुत्रस्य राजा कः ?
९ अश्वस्य नाम किम् ?
१० वासवदत्तायाः पितुः नाम किम् ?
११ कः देहं परित्यक्तुमिच्छति ?
१२ शिलामयी का अभूत् ?
१३ कन्दर्पकेतुः देहं त्यक्तुं कुत्र प्रविशति ?
१४ वासवदत्तां प्राप्तुं कयोः मध्ये युद्धमभवत् ?
१५ शिलापुत्तलिकां कः स्पृशति ?

****